# વૃન્દાવનપૂજા અથવા તુલસીવિષ્ણુપૂજા

Vrindavanapuja TulasIviShNupUjA

sanskritdocuments.org

November 29, 2018

# Vrindavanapuja TulasIviShNupUjA

# વૃન્દાવનપૂજા અથવા તુલસીવિષ્ણુપૂજા

## Sanskrit Document Information


Text title : vRRindavanatulasIviShNupUjA

File name : vRRindavanatulasIviShNupUjA.itx

Category : pUjA, devii, tulasI, devI

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar

Description-comments : tulasI viShNu vRindAvana pUjA

Acknowledge-Permission: Mahaperiaval Trust

Latest update : June 12, 2017

Send corrections to : Sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


November 29, 2018

*sanskritdocuments.org*

Vrindavanapuja TulasIviShNupUjA

# વૃન્દાવનપૂજા અથવા તુલસીવિષ્ણુપૂજા

કાર્તિકે શુક્લદ્વાદશ્યાં વૃન્દાવને મહાવિષ્ણું તુલસીં ચ પૂજયેત્ ।
તુલસીસમીપે મહાવિષ્ણુપ્રતિમાં નિધાય, વિઘ્નેશં સમ્પૂજ્ય,

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥

શ્રીપરમેશ્વરપ્રીત્યર્થં શુભે ... તિથૌ તુલસી મહાવિષ્ણુ
પ્રસાદસિદ્ધ્યર્થં તુલસી મહાવિષ્ણુપૂજાં કરિષ્યે । ઇતિ સઙ્કલ્પ્ય
વિઘ્નેશમુદ્વાસ્ય કલશપૂજાં કૃત્વા, તુલસીં વિષ્ણું ચ ધ્યાયેત્ ।
ધ્યાયામિ તુલસીં દેવીં શ્યામાં કમલલોચનામ્ ।
પ્રસન્વદનામ્ભોજાં વરદામભયપ્રદામ્ ॥ તુલસીં ધ્યાયામિ
ધ્યાયામિ વિષ્ણું વરદં તુલસીપ્રિયવલ્લભમ્ ।
પીતામ્બરં પદ્મનેત્રં વાસુદેવં વરપ્રદમ્ ॥ મહાવિષ્ણું ધ્યાયામિ ॥

વાસુદેવ પ્રિયે દેવિ સર્વદેવસ્વરૂપિણિ ।
આગચ્છ પૂજાભવને સદા સન્નિહિતા ભવ ॥

આગચ્છાગચ્છ દેવેશ તેજોરાશે જગત્પતે ।
ક્રિયમાણાં મયા પૂજાં વાસુદેવ ગૃહાણ ભોઃ ॥

-તુલસીવિષ્ણૂ - આવાહયામિ
નાનારત્નસમાયુક્તં કાર્તસ્વરવિભૂષિતમ્ ।
આસનં કૃપયા વિષ્ણો તુલસિ પ્રતિગૃહ્યતામ્ ।
તુલસી વિષ્ણુભ્યાં નમઃ - આસનં સમર્પયામિ ।
ગઙ્ગાદિસર્વતીર્થેભ્યો વાસુદેવ મયા હૃતમ્ ।
તોયમેતત્સુખસ્પર્શં પાદ્યાર્થં પ્રતિગૃહ્યતામ્ ॥

નાનાનદીસમાનીતં સુવર્ણકલશસ્થિતમ્ ।
પાદ્યં ગૃહાણ તુલસિ પાપં મે વિનિવારય ॥ (પાદ્યં)

નમસ્તે દેવદેવેશ નમસ્તે કમલાપતે ।
નમસ્તે સર્વવિનુત ગૃહાણાર્ઘ્યં નમોઽસ્તુ તે ॥

અર્ઘ્યં ગૃહાણ દેવિ ત્વં અચ્યુતપ્રિયવલ્લભે ।
અક્ષતાદિસમાયુક્તં અક્ષય્યફલદાયિનિ ॥ (અર્ઘ્યં)
કર્પૂરવાસિતં તોયં ગઙ્ગાદિભ્યઃ સમાહૃતમ્ ।
આચમ્યતાં જગન્નાથ મયા દત્તં ચ ભક્તિતઃ ॥

ગૃહાણાચમનાર્થાય વિષ્ણુવક્ષઃ સ્થલાલયે ।
સ્વચ્છં તોયમિદં દેવિ સર્વપાપવિનાશિનિ ॥ (આચમનીયમ્)
દધ્યાજ્યમધુસંયુક્તં મધુપર્કં મયાઽઽહૃતમ્ ।
ગૃહાણ વિષ્ણો વરદ લક્ષ્મીકાન્ત નમોઽસ્તુ તે ॥

મધુપર્કં ગૃહાણેમં મધુસૂદનવલ્લભે ।
મધુદધ્યાજ્ય સંયુક્તં મહાપાપવિનાશિનિ । (મધુપર્કં)
મધ્વાજ્યશર્કરાયુક્તં દધિક્ષીરસમન્વિતમ્ ।
પઞ્ચામૃતં ગૃહાણેદં ભક્તાનામિષ્ટદાયક ॥

પઞ્ચામૃતં ગૃહાણેદં પઞ્ચપાતકનાશિનિ ।
દધિક્ષીરસમાયુક્તં દામોદરકુટુમ્બિનિ ॥ (પઞ્ચામૃતમ્ )
ગઙ્ગા કૃષ્ણા ચ યમુના નર્મદા ચ સરસ્વતી ।
તુઙ્ગા ગોદાવરી વેણી ક્ષિપ્રા સિન્ધુર્ઘટપ્રભા ॥

તાપી પયોષ્ણી સરયૂસ્તાભ્યઃ સ્નાનાર્થમાહૃતમ્ ।
તોયમેતત્સુખસ્પર્શં સ્નાનીયં ગૃહ્યતાં હરે ॥

ગઙ્ગાગોદાવરીકૃષ્ણાતુઙ્ગાદિભ્યઃ સમાહૃતમ્ ।
સલિલં દેવિ તુલસિ સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ (સ્નાનં )
સર્વભૂષાધિકે સૌમ્યે લોકલજ્જાનિવારણે ।
વાસસી પ્રતિગૃહ્ણાતુ લક્ષ્મીજાનિરધોક્ષજઃ ॥

પીતામ્બરમિદં દિવ્યં પાતકવ્રજનાશિનિ ।
પીતામ્બરપ્રિયે દેવિ પરિધત્સ્વ પરાત્પરે ॥ (વસ્ત્રમ્)
ભૂષણાનિ વરાર્હાણિ ગૃહીતં તુલસીશ્વર ।
કિરીટહારકેયૂરકટકાનિ હરેઽમૃતે ॥ (આભરણાનિ)
ચન્દનાગરુકર્પૂરકસ્તૂરીકુઙ્કુમાન્વિતમ્ ।
ગન્ધં સ્વીકુરુતં દેવૌ રમેશહરિવલ્લભે ॥ (ગન્ધાન્ )

મલ્લિકાકુન્દમન્દારઞ્જાજીવકુલ ચમ્પકૈઃ ।
શતપત્રૈશ્ચ કલ્હારૈઃઅર્ચયે તુલસીહરી । (પુષ્પાણિ)
અઙ્ગપૂજા-
વૃન્દાયૈ અચ્યુતાય નમઃ - પાદૌ પૂજયામિ ।
તુલસ્યૈ અનન્તાય નમઃ - ગુલ્ફૌ પૂજયામિ ।
જનાર્દનપ્રિયાયૈ તુલસીકાન્તાય નમઃ - જઙ્ઘે પૂજયામિ ।
જન્મનાશિન્યૈ ગઙ્ગાધરપદાય નમઃ - જાનુની પૂજયામિ ।
ઉત્તમાયૈ ઉત્તમાય નમઃ - ઊરૂ પૂજયામિ ।
કમલાક્ષ્યૈ કમલાક્ષાય નમઃ - કટિં પૂજયામિ ।
નારાયણ્યૈ નારાયણાય નમઃ - નાભિં પૂજયામિ ।
ઉન્નતાયૈ ઉન્નતાય નમઃ - ઉદરં પૂજયામિ ।
વરદાયૈ વરદાય નમઃ - વક્ષઃ પૂજયામિ ।
સ્તવ્યાયૈ સ્તવ્યાય નમઃ - સ્તનૌ કૌસ્તુભં પૂજયામિ ।
ચતુર્ભુજાયૈ ચતુર્ભુજાય નમઃ - ભુજાન્ પૂજયામિ ।
કમ્બુકણ્ઠ્યૈ વનમાલિને નમઃ - કણ્ઠં પૂજયામિ ।
કલ્મષઘ્ન્યૈ કલ્મષઘ્નાય નમઃ - કર્ણૌ પૂજયામિ ।
મુનિપ્રિયાયૈ મુનિપ્રિયાય નમઃ - નેત્રે પૂજયામિ ।
શુભપ્રદાયૈ શુભપ્રદાય નમઃ -શિરઃ પૂજયામિ ।
સર્વાર્થદાયિન્યૈ સવાર્થદાયિને નમઃ - સર્વાણ્યઙ્ગાનિ પૂજયામિ ।
(તુલસી વિષ્ણુ નામાવલ્યા પુષ્પાર્ચના)
ધૂપં ગૃહાણ વરદે દશાઙ્ગેન સુવાસિતમ્ ।
તુલસ્યમૃતસમ્ભૂતે ધૂતપાપે નમોઽસ્તુ તે ॥

દશાઙ્ગો ગુગ્ગુલૂપેતઃ સુગન્ધઃ સુમનોહરઃ ।
શ્રીવત્સાઙ્ક હૃષીકેશ ધૂપોઽયં પ્રતિગૃહ્યતામ્ ॥ (ધૂપં)
વર્તિત્રય યુતં દીપં ગોઘૃતેન સમન્વિતમ્ ।
દીપં દેવિ ગૃહાણેમં દૈત્યારિહૃદયસ્થિતે ॥

સાજ્યં ત્રિવર્તિસંયુક્તં દીપં દેવ જનાર્દન ।
ગૃહાણ મઙ્ગલં દીપં ત્રૈલોક્યતિમિરં હર ॥ (દીપમ્)
નાનાભક્ષ્યૈશ્ચ ભોજ્યૈશ્ચ ફલૈઃ ક્ષીરઘૃતાદિભિઃ ।
નૈવેદ્યં ગૃહ્યતાં યુક્તં નારાયણમનઃ પ્રિયે ॥

ભોજ્યં ચતુર્વિધં ચોષ્યભક્ષ્યસૂપફલૈર્યુતમ્ ।

દધિમધ્વાજ્યસંયુક્તં ગૃહ્યતામમ્બુજેક્ષણ । (મહાનૈવેદ્યં)
કર્પૂરચૂર્ણતામ્બૂલવલ્લીપૂગફલૈર્યુતમ્ ।
જગતઃ પિતરાવેતત્તામ્બૂલં પ્રતિગૃહ્યતામ્ । (તામ્બૂલં )
નીરાજનં ગૃહાણેદં કર્પૂરૈઃ કલિતં મયા ।
તુલસ્યમૃતસમ્ભૂતે ગૃહાણ હરિવલ્લભે ॥

ચન્દ્રાદિત્યૌ ચ નક્ષત્રં વિદ્યુદગ્નિસ્ત્વમેવ ચ ।
ત્વમેવ સર્વજ્યોતીંષિ કુર્યાં નીરાજનં હરે ॥ (નીરાજનં)
પ્રકૃષ્ટપાપનાશાય પ્રકૃષ્ટફલસિદ્ધયે ।
યુવાં પ્રદક્ષિણી કુર્વે તુલસીશૌ પ્રસીદતમ્ ॥ (પ્રદક્ષિણં)
નમોઽસ્તુ પીયૂષ સમુદ્ભવાયૈ નમોઽસ્તુ પદ્માક્ષમનઃ પ્રિયાયૈ ।
નમોઽસ્તુ જન્માપ્યય ભીતિહન્ત્ર્યૈ નમસ્તુલસ્યૈ જગતાં જનન્યૈ ॥

શઙ્ખચક્રગદાપાણે દ્વારકાનિલયાચ્યુત ।
ગોવિન્દ પુણ્ડરીકાક્ષ રક્ષ માં શરણાગત(તા)મ્ ॥ (નમસ્કારાન્)
પુષ્પાઞ્જલિં ગૃહાણેદં પઙ્કજાક્ષસ્ય વલ્લભે ।
નમસ્તે દેવિ તુલસિ નતાભીષ્ટફલપ્રદે ।
મન્દારનીલોત્પલકુન્દજાતી પુનાગમલ્લીકરવીરપદ્મૈઃ ।
પુષ્પાઞ્જલિં તે જગદેકબન્ધો હરે ત્વદઙ્ઘ્રૌ વિનિવેશયામિ ।
(મન્ત્રપુષ્પાઞ્જલિં)
આયુરારોગ્યમતુલમૈશ્વર્યં પુત્રસમ્પદઃ ।
દેહિ મે સકલાન્કામાન્ તુલસ્યમૃતસમ્ભવે ॥

નમો નમઃ સુખવરપૂજિતાઙ્ઘ્રયે નમો નમો નિરુપમમઙ્ગલાત્મને ।
નમો નમો વિપુલપદૈકસિદ્ધ્યે નમો નમઃ પરમદયાનિધે હરે ॥

(પ્રાર્થનાં )
નમસ્તે દેવિ તુલસિ નમસ્તે મોક્ષદાયિનિ ।
ઇદમર્ઘ્યં પ્રદાસ્યામિ સુપ્રીતા વરદા ભવ ॥

લક્ષ્મીપતે નમસ્તુભ્યં તુલસીદામભૂષણ ।
ઇદમર્ઘ્યં પ્રદાસ્યામિ ગૃહાણ ગરુડધ્વજ ॥

શ્રી તુલસ્યૈ મહાવિષ્ણવે ચ નમઃ - ઇદ મર્ઘ્યમિદ મર્ઘ્યમિદમર્ઘ્યમ્ ॥

ઇતિ ત્રિઃ ॥

નમસ્તે દેવિ તુલસિ માધવેન સમન્વિતા ।
પ્રયચ્છ સકલાન્કામાન્ દ્વાદશ્યાં પૂજિતા મયા ॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા બુધ્યાત્મના વા પ્રકૃતેઃ સ્વભાવાત્ ।
કરોમિ યદ્યત્સકલં પરસ્મૈ નારાયણાયેતિ સમર્પયામિ ॥

ૐ તત્સત્

Encoded and proofread by Shree Devi Kumar

---

*Vrindavanapuja TulasIviShNupUjA*
pdf was typeset on November 29, 2018

Please send corrections to *sanskrit@cheerful.com*